# Devadibhih Kritam 3 Shiva Stotram

# દેવાદિભિઃ કૃતં ૩ શિવસ્તોત્રમ્

## Document Information

Text title : Devadibhih Kritam 3 Shiva Stotram

File name : devAdibhiHkRRitaM3shivastotram.itx

Category : shiva, skandapurANa, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : skandapurANa | prabhAsakhaNDa | adhyAya 11/149-168||

Latest update : August 24, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

August 23, 2025

*sanskritdocuments.org*

# દેવાદિભિઃ કૃતં ૩ શિવસ્તોત્રમ્

દેવા ઊચુઃ ।
આદિદેવોઽસિ દેવાનાં જાતમેતત્સ્વયં તવ ।
સર્ગસ્થિત્યન્તકાલેષુ ત્રિધા ભેદેન તિષ્ઠસિ ॥ ૧૪૯॥

સ્વસ્તિ તેઽસ્તુ જગન્નાથ ધર્મવર્ષહિમાકર ।
ઇન્દ્ર આગમ્ય તં દેવં લિખ્યમાનમથાસ્તવીત્ ।
જય દેવ જગત્સ્વામિઞ્જય દેવ જગત્પતે ॥ ૧.૧૧.૧૫॥

ઋષયશ્ચ તતઃ સપ્ત વસિષ્ઠાત્રિપુરોગમાઃ ।
તુષ્ટુવુર્વિવિધૈઃ સ્તોત્રૈઃ સ્વસ્તિ સ્વસ્તીતિ વાદિનઃ ।
વેદોક્તિભિરથાગ્ર્યાભિર્વાલખિલ્યાશ્ચ તુષ્ટુવુઃ ॥ ૧૫૧॥

વાલખિલ્યા ઊચુઃ ।
નમસ્તે ઋક્સ્વરૂપાય સામરૂપાય તે નમઃ ।
યજુઃસ્વરૂપરૂપાય સામ્નાં ધામગ તે નમઃ ॥ ૧૫૨॥

જ્ઞાનૈકરૂપદેહાય નિર્ધૂતતમસે નમઃ ।
શુદ્ધજ્યોતિઃસ્વરૂપાય ત્રિમૂર્તાયામલાત્મને ॥ ૧૫૩॥

વરિષ્ઠાય વરેણ્યાય સર્વસ્મૈ પરમાત્મને ।
નમોઽખિલજગદ્વ્યાપિરૂપાયાનન્તમૂર્ત્તયે ॥ ૧૫૪॥

સર્વકારણભૂતાય નિષ્ઠાય જ્ઞાનચેતસામ્ ।
નમઃ સૂર્યસ્વરૂપાય પ્રકાશાલક્ષ્યરૂપિણે ॥ ૧૫૫॥

ભાસ્કરાય નમસ્તુભ્યં તથા દિનકૃતે નમઃ ।
સર્વસ્મૈ હેતવે ચૈવ સન્ધ્યાજ્યોત્સ્નાકૃતે નમઃ ॥ ૧૫૬॥

ત્વં સર્વમેતદ્ભગવઞ્જગચ્ચ ભ્રમતા ત્વયા ।
ભ્રમત્યા વિશ્વમખિલં બ્રહ્માણ્ડં સચરાચરમ્ ।
ત્વદંશુભિરિદં સર્વં સ્પૃષ્ટં વૈ જાયતે શુચિ ॥ ૧૫૭॥

ક્રિયતે ત્વત્કરસ્પર્શૈર્જલાદીનાં પવિત્રતા ॥ ૧૫૮॥

હોમદાનાદિકો ધર્મો નોપકારાય જાયતે ।
તાત યાવન્ન સંયોગિ જગદેતત્ત્વદંશુભિઃ ॥ ૧૫૯॥

ઋચસ્તે સકલા હ્યેતાસ્તથા યાનિ યજૂંષિ ચ ।
સકલાનિ ચ સામાનિ નિપતન્તિ ત્વદઙ્ગતઃ ॥ ૧.૧૧.૧૬૦॥

ઋઙ્મયસ્ત્વં જગન્નાથ ત્વમેવ ચ યજુર્મયઃ ।
યતઃ સામમયશ્ચૈવ તતો નાથ ત્રયીમયઃ ॥ ૧૬૧॥

ત્વમેવ બ્રહ્મણો રૂપં પરં ચાપરમેવ ચ ।
મૂર્ત્તામૂર્ત્તં તથા સૂક્ષ્મં સ્થૂલં રૂપેણ સંસ્થિતઃ ॥ ૧૬૨॥

નિમેષકાષ્ઠાદિમયઃ કાલરૂપક્ષણાત્મકઃ ।
પ્રસીદ સ્વેચ્છયા રૂપં સ્વં તેજઃ શમનં કુરુ ।
ત્વં દેવ જગતાં હેતોર્દુઃખં સહસિ દુઃસહમ્ ॥ ૧૬૩॥

ત્વં નાથ મોક્ષિણાં મોક્ષો ધ્યેયસ્ત્વં ધ્યાયતાં વરઃ ।
ત્વં ગતિઃ સર્વભૂતાનાં કર્મકાણ્ડનિવર્તિનામ્ ॥ ૧૬૪॥

શં પ્રજાભ્યોઽસ્તુ દેવેશ શન્નોઽસ્તુ જગતામ્પતે ॥ ૧૬૫॥

ત્વં ધાતા વિસૃજસિ વિશ્વમેક
એવ ત્વં પાતા સ્થિતિકરણાય સમ્પ્રવૃત્તઃ ।
ત્વય્યન્તે લયમખિલં પ્રયાતિ ચૈત-
ત્ત્વત્તોઽન્યો ન હિ તપનાસ્તિ સર્વદાતા ॥ ૧૬૬॥

ત્વં બ્રહ્મા હરિહરસંજ્ઞિતસ્ત્વમિન્દ્રો
વિત્તેશઃ પિતૃપિતરમ્બુપઃ સમીરઃ ।
સોમોઽગ્નિર્ગગનમહાધરાદિરૂપઃ
કિં ન ત્વં સકલમનોરથપ્રદાતા ॥ ૧૬૭॥

યજ્ઞૈસ્ત્વામનુદિનમાત્મકર્મસક્તાઃ
સ્તુવન્તો વિવિધપદૈર્દ્વિજા યજન્તિ ।
ધ્યાયન્તઃ સવિનયચેતસો ભવન્તં
યોગસ્થાઃ પરમપદં પ્રયાન્તિ મર્ત્ત્યાઃ ॥ ૧૬૮॥

તપસિ પચસિ વિશ્વં પાસિ ભસ્મીકરોષિ
પ્રકટયસિ મયૂખૈર્હ્લાદયસ્યંશુગર્ભૈઃ ।
સૃજસિ કમલજન્મા પાલયસ્યચ્યુતાખ્યઃ
ક્ષપયસિ ચ યુગાન્તે રુદ્રરૂપસ્ત્વમેકઃ ॥ ૧૬૯॥

ઇતિ શ્રીસ્કન્દપુરાણે પ્રભાસખણ્ડે પ્રભાસક્ષેત્રમાહાત્મ્યે એકાદશાધ્યાયાન્તર્ગતં
દેવાદિભિઃ કૃતં શિવસ્તોત્રં સમાપ્તમ્ ।

સ્કન્દપુરાણ । પ્રભાસખણ્ડ । અધ્યાય ૧૧/૧૪૯-૧૬૮॥

skandapurANa . prabhAsakhaNDa . adhyAya 11/149-168..

Proofread by PSA Easwaran

*Devadibhih Kritam 3 Shiva Stotram*

pdf was typeset on August 23, 2025

Please send corrections to *sanskrit@cheerful.com*